आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ३६/१

कृष्णयजुर्वेदीयं

# तैत्तिरीयारण्यकम्

श्रीमत्सायणाचार्यविरचितभाष्यसमेतम् ।

( सपरिशिष्टम् )

तत्र प्रथमप्रपाठकादारभ्य षष्ठप्रपाठकपर्यन्तोऽयं

प्रथमो भागः ( १ )

---

एतत्पुस्तकं वे० शा० रा० रा० " बाबाशास्त्री फडके "

इत्येतैः संशोधितम् ।

तच्च

आनंदाश्रम-संस्था विश्वस्तैः ।

पुण्याख्यपत्तने

आनन्दाश्रममुद्रणालये

मुद्रयित्वा

प्रकाशितम् ।

---

शालिवाहनशकाब्दाः १९०३

ख्रिस्ताब्दाः १९८१

( अस्य सर्वेऽधिकारा राजशासनानुसारेण स्वायत्तीकृताः )

मूल्यं-त्रिंशद्रूपकात्मकम् [ ३० रु. ]

अथ प्रथमप्रपाठके त्रयोविंशोऽनुवाकः ।

---

अथास्मिन्नप्यनुवाके सृष्ट्युपन्यासमुखेनाऽऽरुणकेतुकमग्निं तदङ्गभूता अपश्च प्रशंसति । तत्र सृष्ट्यादौ कामोत्पत्तिं दर्शयति—

**आपो वा इदमासन्त्सलिलमेव । स प्रजापतिरेकः पुष्करपर्णे समभवत् । तस्यान्तर्मनसि कामः समवर्तत । इद॰ सृजेयमिति । तस्माद्यत्पुरुषो मनसाऽभिगच्छति । तद्वाचा वदति । तत्कर्मणा करोति । तदेषाऽभ्यनूक्ता, इति ।**

यदिदं जगदिदानीमस्माभिर्दृश्यते तदिदमुत्पत्तेः पूर्वमाप एवाऽऽसन्, न तु देवतिर्यङ्मनुष्यादिकं किंचिदपि भौतिकमासीत् । पृथिव्यादिभूतान्तरमपि वारयितुं सलिलमेवेत्युच्यते । तास्वप्सु मध्ये कस्मिंश्चित्[1]पुष्करपर्णे जगदीश्वरः स प्रजापतिः समभवत्सम्यगाविर्भूयावस्थितः । तस्य प्रजापतेर्मनसोऽन्तर्मध्ये सर्वमिदं जगत्सृजेयमित्येवं काम उदपद्यत । तस्मात्प्रजापतेर्वाक्शरीरप्रभृतिभ्यां पूर्वं सर्वप्रवृत्तिहेतुः कामो मनस्याविरभूत्तस्मात्प्रजापतिसंततावुत्पन्नः सर्वः पुरुष इदं कार्यं करिष्यामीत्यादौ मनसा चिन्तयति तत्तथैव वाचा वदति कर्मणा शरीरव्यापारेणापि तथैव करोति । तत्तस्मिन्कामस्य प्रथमोत्पत्तिलक्षणेऽर्थे काचिदृक्शाखान्तरेऽभ्यनूक्ता ।

तामेतामृचं दर्शयति—

**कामस्तदग्रे समवर्तताधि । मनसो रेतः प्रथमं यदासीत् ( १ ) । सतो बन्धुमसति निरविन्दन् । हृदि प्रतीष्या कवयो मनीषेति, इति ।**

तत्तदानीं सृष्टिकाले प्रजापतेः सकाशादग्रे प्रथमं कामः सर्वं सृजेयमित्यभिलाषः, अधि समवर्तताऽऽधिक्येन सम्यगुत्पन्नः । यद्यदा मनसः प्रथमं रेतः कार्यमासीत् । तदेति पूर्वत्रान्वयः । पूर्वसृष्टौ लीनायामव्यक्ते जगत्कारणे स्वक्ष्यमाणप्राणिकर्मोद्भवे सति यदा प्रजापतेर्मानसं प्रथमं कार्यमुत्पन्नं तदा तत्कार्यं सृष्टिविषयेच्छारूपेण निष्पन्नमित्यर्थः । मनीषा मनस ईशितारः कवयो विद्वांसस्तत्तत्सृष्टिगताः प्रजापतयो हृदि स्वचित्ते प्रतीष्य प्रत्येकं निश्चित्य सतो विद्यमानस्य व्यक्तस्य जगतो बन्धुं बन्धकमुत्पत्तिहेतुं काममसत्यव्यक्ते कारणे निरविन्दन्निष्कृष्य लब्धवन्तः । न केवलमेतस्यामेव सृष्टौ किंतु सर्वास्वपि सृष्टिषु प्रवृत्ताः प्रजापतयः काममेव प्रथमं

---

१ ख. ग. °र्मनोमध्ये । २ ग. तदिति ।



लब्धवन्त इत्यर्थः । इतिशब्दो मन्त्रसमाप्तौ । अनेन मन्त्रेणैकामिष्टकामुपदध्यात् । तथा च बौधायन आह—'कामस्तदग्र इति संकल्पवतीम्' इति ।

यथोक्तकाममाहात्म्यवेदनं प्रशंसति—

**उपैनं तदुपनमति । यत्कामो भवति । य एवं वेद, इति ।**

यः पुमान्काममाहात्म्यं वेद स पुमान्यत्कामो यद्विषयकामनावान्भवति तद्वस्तु, एनं वेदितारमुपनमति प्राप्नोति । देशकालयोः सामीप्यविवक्षया द्वावुपशब्दावुक्तौ ।

कामानन्तरभाविनीं सृष्टिं दर्शयति—

**स तपोऽतप्यत । स तपस्तप्त्वा । शरीरमधूनुत । तस्य यन्मा॰समासीत् । ततोऽरुणाः केतवो वातरशना ऋषय उदतिष्ठन् ( २ ) । ये नखाः । ते वैखानसाः । ये वालाः । ते वालखिल्याः । यो रसः । सोऽपाम् , इति ।**

स प्रजापतिः सृष्टिं कामयित्वा तपः कृतवान् । नात्र तप उपवासादिरूपं किंतु स्रष्टव्यं वस्तु कीदृशमिति पर्यालोचनरूपम् । अत एवाऽऽथर्वणिका आमनन्ति—'यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः' इति । स प्रजापतिः, तपः पर्यालोचनरूपं कृत्वा स्रष्टव्यविशेषं निश्चित्य स्वकीयं शरीरमधूनुत कम्पितवान् । तस्य कम्पनस्य शरीरस्य यन्मांसमस्ति, तस्मान्मांसा[1]दरुणादिनामकास्त्रिविधा ऋषय उदपद्यन्त । प्रजापतेः सत्यसंकल्पत्वात्तत्संकल्पानुसारेण तत्तद्वस्तूत्पद्यते । तस्य शरीरस्य ये नखा आसंस्ते वैखानसनामका मुनयोऽभवन् । ये च शरीरे वालाः केशास्ते वालखिल्यनामका[2] मुनयोऽभवन् । यः शरीरस्य रसः सारांशः सोऽपां मध्ये कश्चित्कूर्मोऽभूदिति शेषः ।

तेन कूर्मेण सह प्रजापतेः संवादं दर्शयति—

**अन्तरतः कूर्मं भूत॰ सर्पन्तम् । तमब्रवीत् । मम वै त्वङ्मा॰सा । समभूत् ( ३ ) । नेत्यब्रवीत् । पूर्वमेवाहमिहाऽऽसमिति । तत्पुरुषस्य पुरुषत्वम् । स सहस्रशीर्षा पुरुषः । सहस्राक्षः सहस्रपात् । भूत्वोदतिष्ठत् । तमब्रवीत् । त्वं वै पूर्व॰ समभूः । त्वमिदं पूर्वः कुरुष्वेति, इति ।**

अन्तरतो जलस्य मध्ये कूर्माकारेण निष्पन्नं तत्रैव संचरन्तं तं पुरुषं[3] प्रजापतिर-

---

१ क. °सादरु° । २ क. ख. °खिल्याना° । ३ ख. ग. °षं स प्र° ।